# श्रीसुब्रह्मण्यभुजङ्गस्तोत्रम् ४

shrI subrahmaNyabhuja NgastotraM 4

sanskritdocuments.org

November 17, 2018

shrI subrahmaNyabhuja NgastotraM 4

# श्रीसुब्रह्मण्यभुजङ्गस्तोत्रम् ४

## Sanskrit Document Information

Text title : shrii subrahmaNyabhujaNgaprayaatastotraM 4

File name : subrabhujanga4.itx

Category : subrahmanya, bhujanga, chandrashekharabhAratI, aShTaka

Location : doc_subrahmanya

Author : 34th Acharya of Shringeri Sharada Peetham , HH Shri Chandrashekhara Bharati

Transliterated by : G Vasanth gsathyaarumugam at gmail.com

Proofread by : G Vasanth, NA

Latest update : November 17, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 17, 2018

*sanskritdocuments.org*

# श्रीसुब्रह्मण्यभुजङ्गस्तोत्रम् ४

सुब्रह्मण्य सुधामयूखसुषमाहङ्कार हुङ्कारकृ-
द्वक्राम्भोरुह पादपङ्कजनतालीष्टार्थ दानव्रत ।
ब्रह्मण्यं कुरु सन्ततं करुणया निर्व्याजया मां विभो
शैलाधीशसुताशिवाननसरोजार्कायितास्याम्बुज ॥ १॥

समुद्रं यथा संश्रयन्ते तटिन्यः विहीनाभिधास्त्यक्त रूपास्तथा माम् ।
प्रविज्ञाय लोका इतीवाभिधित्सुः समुद्राङ्कगश्शम्भुसूनुर्दयाब्धिः ॥ २॥

यथा सैन्धवं चक्षुरग्राह्यमप्सु स्थितं जिह्वया गृह्यतेऽहं तथास्मिन् ।
प्रपञ्चे धिया सूक्ष्मयातीन्द्रियोऽपि प्रविज्ञेय एवं गुहोऽयं व्यनक्ति ॥ ३॥

करोत्यक्षमालां करे यो मनुष्यो भवेदूरुदघ्नो भवाम्भोधिरस्य ।
इतीवाभिधातुं करं साक्षमालं करं चोरुगं शम्भुसूनुर्बिभर्ति ॥ ४॥

मुधायासमालक्ष्य गन्धस्रगादौ विधायाशु कामादि षड्वैरिनाशम् ।
क्रुधाद्याढ्य लभ्येतरात्मस्वरूपं बुधास्सम्भजध्वं मुदा कार्तिकेयम् ॥ ५॥

समुद्रात्तरङ्गा यथाविर्भवन्तो न भिन्नास्समुद्रात्तथायं प्रपञ्चः ।
मदुत्थो न मद्भिन्न इत्येतमर्थं गुहोऽम्भोनिधेस्तीरगोऽभिव्यनक्ति ॥ ६॥

रत्नाकरेण संयोगो रामसेतौ निरीक्षितः ।
महोदधेरिहैवेक्षि महोदधि समागमः ॥ ७॥

सागर द्वय साङ्गत्यं रामसेताविवात्र च ।
करुणाम्बुधिना यस्मात्सङ्गतोऽयं महोदधिः ॥ ८॥

इति श्रीचन्द्रशेखरभारतीमहास्वामिनः विरचितं
श्रीसुब्रह्मण्यभुजङ्गस्तोत्रं सम्पूर्णम् ।

Encoded by G Vasanth gsathyaarumugam at gmail.com

Proofread by G Vasanth, NA

*shrI subrahmaNyabhuja NgastotraM 4*

pdf was typeset on November 17, 2018

Please send corrections to *sanskrit@cheerful.com*